This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणाधिपतये नमः॥ श्रीदक्षिणामूर्तये नमः॥ कटीतटपटीभवल्करत्त्विचर्मकर्मातिगं महोज्वलमहो महो हृदि किमप्यहं भावये॥
कुरंगधरभासुरद्युतिसदायदायदं केत्विषोदरीभुवनसुंदरीनिरुदरीदरीहृस्यते॥१॥ फणीशकृतभूषणं जनितकामसंदूषणं प्रवृद्धनरक-
च्छिदं वृषधरं सुसेव्याश्रयं॥ गणेश्वरसमर्चितं विमलरीत्युमालिंगितं द्विजाधिपतिशेखरं कमपि नीलकंठं नुमः॥२॥ काशिकातिलक-
व्याख्यां समासेन यथामति॥ करिष्ये नीलकंठस्य तु ध्येये तत्कृपान्वितः॥३॥ यद्यपीयानां वा चातरलमतिरस्मादृशाजनः कथं कारं पारं विजि-
तमनसा रंजिगमिषुः॥ तथापि स्वां वाणीं सुरसरितिरथ्योदकमिव पवित्रीकर्तुं यत्नं भवति मायपरिकरः॥४॥ कटीतटेति॥ किमप्यनिर्व-
चनीयमवाङ्मनसगोचरमिति यावत् महोज्वलं महः तेजः हृदि भावये। कथंभूतं कटीतटेपटीभवल्करत्त्विचर्म यस्य तत्। कर्मातिगं कर्म-
भिरप्राप्यं। कुरंगधरश्चंद्रः तस्य भासुरद्युतिर्यद्वातिर्यस्य तत्। किं तत्त्वयदं के भुवनसुंदरीदरीहृस्यते। कथंभूता त्विषोरीमीनोदरी। निरुदरी
सूक्ष्मोदरीत्यर्थः॥१॥ फणीशेति। कमपि नीलकंठं विश्वेश्वरं नुमः। कथंभूतं फणीशेन कृतं भूषणं यस्य तं। जनितं उत्पादितं कामस्य कामदे-
वस्य सम्यक् दूषणं विनाशो येन। प्रवृद्धाः नराः यस्मात्साः प्रवृद्धनरः ब्रह्मा तस्य कं शिरः तच्छिनत्तीति प्रवृद्धनरकच्छिदं तं। यद्वा प्रवृद्धानां न-
राणां कं छिनत्तीति। प्रलये सर्वसंहारकत्वात्। वृषो नंदी तं धरतीति वा हेनत्वेन स्वीकरोतीति वृषधरस्तं। पश्चाद्विषपाठश्च। सुशोभना
सती दाक्षायणी तस्या आश्रयं। गणेश्वरेण गणपतिना समर्चितं। विमलरीतिर्यस्याः तत्कान्ता तामुमा पार्वती तया आलिंगितं। द्विजाधिपतिशे-
खरं चंद्रशेखरमित्यर्थः॥ एतेन च पद्येन स्वेष्टदेवतारूपश्रीकृष्णस्य नुतिरवसेया। तथाहि नीलकंठं श्रीकृष्णं नुमः नितरां इला पृथ्वी यस्मिन्
स नीलः एवंभूतः कंठो यस्य तं। पृथिव्या विष्णुपत्नीत्वात्। कथंभूतं फणीशः कालीयः तस्मिन्कृतं भूषणं चरणचिन्हं येन तं। जनितं का-
मस्य संदूषणं येन तराम क्रीडायां कामुकमानभंजकत्वस्य विख्यातत्वात्। यद्वा जनितः कामः प्रद्युम्नो येन सः जनितकामः। सम्यक् दूषय-
ति दैत्यानिति संदूषणः जनितकामश्चासौ संदूषणस्तं। यद्वा कः ब्रह्मा अः विष्णुः मः रुद्रः कश्च अश्च मश्च कामाः जनिताः कामा येन स तथा।

Acc. No. ~~3135.~~ M-1664
Title - काशिकातिलक सटीक
(अंतिलेखन स्थगित.)
Author - नीलकण्ठ.
Date - ?
Sub - काव्य (-चम्पू)
folio - 14
Xerox - 26.

KKSU LIBRARY
RAMTEK
441 106
M-1664
Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सृष्ट्याद्यर्थं ब्रह्मासुत्पादनात्। सम्यक् दूषयति सर्वमिति संदूषणः महाप्रलये सर्वसंहारकत्वात्। जनितकामश्चासौ संदूषणस्तं। सर्वोत्पत्तिप्रलयक
र्तारमिति यावत्। प्रवृद्धो यो नरकासुरः तं छिनत्तीति तं। अपि वा नरान् कायंति रोदयंतीति नरकाः प्रवृद्धाश्च ते नरकाः प्रवृद्धनरकाः हिरण्याक्ष
प्रभृतयस्तान् छिनत्तीति। अथवा प्रवृद्धा नरका येषां ते प्रवृद्धनरकाः पापिनः तान् छिनत्तीति। परित्राणाय साधूनां विनाशाय च दुष्कृतामित्यु
क्तत्वात्। वृषान् समसंख्याकान् वृषभान् धरतीति तं। नाग्नजित्याः स्वयंवरे तस्य प्रसिद्धत्वात्। यद्वा वृषा इंद्रः। वृत्रहा वृषेत्यमरः। तं रधाति
पोषयतीति वृषधः। कल्पतरुः तं धारयतीति वृषधं सुधर्माख्यसरो वा तं तद्धाराकीर्ति आरन्तेर इति वृषधरः तं। द्वारकां प्रत्युभयानयनस्य
प्रख्यातत्वात्। सुसमीचीनाः सत्याः सत्यभामा तस्याः सुष्ठु सत्यं येषां ते सुसत्याः बलियुधिष्ठिराद्याः तेषां वा आश्रयं। गणानां प्रमथगणा
नामीश्वरो गणेश्वरः शिवः तेन समर्चितं। यद्वा गणेश्वरः शिवः समर्चितो येन तं। विमलश्रीरिति या उ विततकीर्तिलक्ष्मीः तया आलिंगितं। द्वि
जाधिपतेर्गरुडस्य शेखर इव शेखरस्तं। यद्वा द्विजाधिपतिश्चंद्रः शेखर इव शेखरो मूर्द्धन्यस्थानापन्नो यस्य तं। चंद्रवंशोत्पन्नत्वात्। एतेन
वग्रंथकर्तुश्चापि नुतिः। तथाहि निलकंठं नीलकंठनामानं ग्रंथकर्तारं नुमः। कथंभूतं। फणीशेन कृतं महाभाष्यं तदेव भूषणं यस्य तं। जनि
तं कामस्य विषयाभिलाषस्य संदूषणं येन तं। प्रवृद्धो यो नरकः कुंभीपाकादिः जनानां ज्ञानोपदेशेन तं छिनत्तीति तं। वृषो धर्मस्तं धरतीति तं। सु
सुसत्यं सत्यवाक्यं तस्याश्रयं। गणनामीश्वराः पंडिता राजानो वा तैः समर्चितं। विमलश्रीरिति या उमा ब्रह्मविद्या। उमा हैमवतीमित्यादिश्रु
तेः तया आलिंगितं। द्विजाधिपतीनां शेखरं शिरोभूषणमित्यर्थः॥२॥ अथ समस्तवेदशाखापाठपटुतरसिद्धांतपारीणनिरुपममा
धुरीधुरीणगद्यपद्यनिर्माणकुशलपंडितमंडलीविकचकुमुद्वतीरमणायमानोनेकांतेवासिजनानल्पकल्पकल्पितविविधसंसारसं
तानसंतापोपशमदूरवगाहपरवाक्यप्रमाणजनितोद्धतमानानामृतोद्गारधारासंपातनिरंतरविडंबितशारदवर्ण्यवारिवाहव्यूहो महामहो
पाध्यायः श्रीनीलकंठभट्टश्चिकीर्षितस्य ग्रंथस्यात्मीयत्व॥ श्रीदक्षिणामूर्तेर्येन मग॥ वंदे गुरुं शिवं साम्बं दक्षिणामूर्तिमव्ययं॥ यद्दृ
दनेन मंदोपि विदेद्गुरुसमानतां॥३॥ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का॰ टि॰
५२॥

स्फोरणाय स्वीयनानाविधनिबंधस्याधारणं स्वमुद्रारूपमभीष्टदायकं गुरुवंदनप्रतिपादकं पद्यं माशेपठति वंदे गुरुमिति। कथंभूतं। शिवं।
परब्रह्मस्वरूपं। शिवमद्वैतं चतुर्थं मन्यंत इत्यादिश्रुतेः। गुरुरेव परब्रह्मेत्यादिस्मृतेर्गुरुपरब्रह्मणोरैक्यप्रतिपादनं तत्रापि गुरोरेव ब्रह्म
साक्षात्कारहेतुत्वात् प्रथमं गुरुपदोपादानं। ननु निराकारस्य परब्रह्मणः कथं वंदनमित्यत आह। सांबमिति। अंबया सहितं मायोपहि
तं चैतन्यं साकारमित्यर्थः। इतरव्यावृत्त्यर्थं दक्षिणामूर्तिमिति। ननु साकारत्वे षड्विकारसंबंधः प्राप्त इत्यत आह। अव्ययमिति।
न व्येतीत्यव्ययं। अस्ति जायते वर्द्धते विपरिणमते अपक्षीयते विनश्यतीति षड्भाव विकाररहितमित्यर्थः। वंदनफलं दर्शयति। यद्वद
नेनेति। यस्य वदनेन मंदः मूढोपि गुरोः बृहस्पतेः समानतां विदत्वं प्राप्नुयात्। विद्लृ लाभे। अथवा अत्र मंदत्वं मलाज्ञानोपहित देहाद्यात्मा
ध्यासेन शोकमोहसुखदुःखाद्यभिमानित्वं। ततो गुरूपदेशाव श्रवणाद्ध्यारोपापवादन्यायपुरःसरं परिशोधिततत्त्वमस्यादिमहावाक्यजी
वब्रह्मणोरैक्यरूपमखंडार्थं विदित्वा ब्रह्मसाकारतया वै स्थितिर्गुरुसमानतेति। तथा च श्रुतिः। ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः॥१॥ प्रारिप्सि
तग्रंथपरिसमाप्तिप्रचयगमनादिपरिप्रासमयसमाचरितमीश्वरप्रणुतिरूपं मंगलं शिष्यशिक्षार्थं व्याख्यातृश्रोतृणामनुषंगतामंगला
यच्च निबध्नाति। अंबिकेति। अंबिका पार्वती तस्याः हृदयमेवांभोजं। अत्राभेदरूपकालंकारः। विषयविषयिणोरभेदेन रंजनात्। तद्धृदंभो
जस्य मरंदः मकरंदः मरंदो मकरंदवदिति शाब्दभेदप्रकारः। तस्यास्वादः आस्वादनं तस्मिन् बंभरो भ्रमरः तत्संबोधने। हे हिंदिरश्चंचरीको
रोलंबो बंभरोपि चेत्यमरशेषः। भ्रमरइवाचरविंदमकरंदं पार्वतीहृदयांतर्वर्तिस्वविषयकानुरागरसं गृहणातीत्यर्थः। शिवइति तस्मिन् भ्रमर
त्वारोपः। नायिकेयं स्वीया स्वाधीनपतिका। स्वामिन्येवानुरक्ता स्वीया निरंतराज्ञाकरप्रिया स्वाधीनपतिकेति तल्लक्षणात्। नायकश्चायं
॥अंबिकाहृदंभोजमरंदास्वादबंभर॥ वंदारुकविमंदारपाहि मां भववांकर॥ ६ ॥मनुकूलः। तल्लक्षणं तु सार्वकालिक
परांगनापराङ्मुखत्वे सति सर्वकालमंगनानुरक्तत्वं। शृंगारालंबनत्वे सति स्त्रीत्वं नायिकायाः तथात्वे सति पुंस्त्वं नायकस्य लक्षणं। शृंगार

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसमयेनिरूपयिष्यामः। ननु किमिदं नामालंकारत्वं यद्व्याप्यधर्मोरूपकत्वमिति चेदत्राहुः। चमत्कृत्यतिशयाधायकत्वं तच्छब्दार्था
न्यतरनिष्ठायाविषयितासंबंधावच्छिन्नाचमत्कारातिशयजनकतावच्छेदकतानवच्छेदकत्वमिति यावत्। चमत्कृतिराल्हादविशेषः।
सहृदयहृदयप्रमाणकः। अनुप्रासादिविशिष्टशब्दज्ञानादुपमादिविशिष्टज्ञानाच्च चमत्कारातिशयोदयात् शब्दार्थयोस्तन्निष्ठचमत्कृ
त्यतिशयजनकतायाविषयितयावच्छेदकत्वेन तद्विशेषणीभूतानुप्रासोपमादेश्च तन्निष्ठावच्छेदकतावच्छेदकत्वात् शब्दनिष्ठत्वमनुप्रासा
दिष्वर्थनिष्ठत्वं चोपमादिषु लक्षणसमन्वयः। हारादिवालंकारास्तेनुप्रासोपमादय इत्यनुप्रासादीनामप्यलंकारत्वस्योक्तत्वात् त
धिकमन्यत्रानुसंधेयमिति। अथवाऽम्बिकायाः हृत्तत्रायते गच्छतीति अयः हृदंबिकाहृदयः अंभोजमिवांभोजं चरणकमलं अर्थात्तावे
ल्याएवतस्य मरंदस्तस्यास्वादे भ्रमरः। अत्र रूपकातिशयोक्तिः उपमेयमुपमावाचकशब्देनैव निगीर्याध्यवसानात्। वंदारुः वंदनशीलः सन्चा
सौ कविः काव्यकर्ता तस्य मंदारः कल्पवृक्षः। यद्वा वंदारुश्चासौ लोकः ब्रह्मा स एव विः पक्षी तस्य मंदारः ब्रह्मलोकभक्तरूपस्य निवासस्थानं। अथवा
वंदारव एव वंदारुकाः तेषां विशेषेण मंदानच्छा अराः कालचक्रनेमयः यस्मात् सः तत्संबोधनं वंदारुकविमंदार। यद्वा वंदारुकाः भक्ताः ते विमं
राः सर्वोत्कृष्टा यस्मात् सः। तदुक्तं तवैश्वर्यं यत्नाद्यदुपरि विरिंचिर्हरिरधः परिच्छेत्तुं यातावनलमिति। नराति आदत्ते देशकालवस्तुपरिच्छेद
मिति अरः तत्संबोधनं अर। न विद्यते रः धनं यस्य सः अरः श्रुतिर्वा। अथवा न विद्यते नरः कामो यस्मात् सः अरः। रः शीद्रस्य धनादिवाचक
त्वमेकाक्षरकोशवशात्। यद्वा अः विष्णुः रः अग्निः अनयोः समाहारः अरः हे अर। देवपूज्यत्वाददइतिपदेन विष्णोरुल्लेखः। अपकृष्ट
त्वादद्रतिपदेनाग्नेः तथा च श्रुतिः। अग्निर्वै देवानामवमो विष्णुः परम इति। तथा च सर्वदेवात्मकत्वमुक्तं। भवेतिपदेन भूधातोः सत्ता
वाचित्वात्सद्रूपत्वमुक्तं। सत्वं त्रिकालाबाध्यत्वं। शंकरेतिपदेन शं सुखं करोतीति व्युत्पत्त्या लोकानामानंदकरत्वमुक्तं। तच्चस्वस्यचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रानंदस्वरूपत्वं विनानुपपन्नमिति तत्स्वरूपत्वं सूचितं। तथा च श्रुतिः। सत्यं ज्ञानमनंतं ब्रह्म आनंदो ब्रह्मेति व्यजानादिति। अंबिकाहृदयेत्य
नेन अंबिकामूलप्रकृतिः तदंतर्यामित्वात्सर्वांतर्यामित्वं सूचितं। अनुष्टुप्छंदः। पंचमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः॥ षष्ठं गुरु विजानीया
दिति तल्लक्षणत्वात्। अत्र प्रथमं मवर्णोपादानात्संपत्तिः। तदुक्तं अवर्णात्संपत्तिर्भवतीति। नन्वेतद्ग्रंथस्य भगवत्प्रसादकृतत्वान्मंगलायतनत्वेन भ
गवत्प्रतिपादकत्वाच्च मंगलरूपत्वं तथा च किमनेनाल्पविचारेण। तदुक्तं भगवता वेदव्यासेन भागवते। तद्वाग्विसर्गो जनताघविप्लवो
यस्मिन्प्रतिश्लोकमबद्धवत्यपि। नामान्यनंतस्य यशोंकितानि यच्छृण्वंति गायंति गृणंति साधव इति॥ स चासौ वाग्विसर्गश्च: वा
चः प्रयोगः। जनानां समूहो जनता तस्या अघविप्लावयतीति नाशयतीति तथा। यस्मिन्वाग्विसर्गे अबद्धवत्यपि अपशब्दादियुक्ते
पि प्रतिश्लोकमनंतस्य यशोंकितानि नामानि भवंति। तत्र हेतुः। यत् यानि नामानि साधवो महांतः वक्तरि सति रटंत्येवंति श्रोतरि सति
गृणंति अन्यदा तु स्वयमेव गायंति कीर्तयंतीत्यर्थः। अत एव देवतावाचकाः शब्दा ये च भद्रादिवाचकाः॥ ते सर्वे नेव वर्णितं घाः स्युर्लिपितो
गलतोपि वेति संगच्छत इति चेत्। भगवच्चरणारविंदचिन्मकरंदसंभरितहृदयांतरालानां विदुषामेवमेव अमृतलाभेन्यानपेक्षणवत्।
इतरेषां विदुषां दुग्धे शर्करादिवद्गुणगणादीनामप्यधिक्षादर्शनेन तत्संतोषार्थं विचारकरणं। इत्थं सम्यङ्निरूपितमपि यदि केचित्परोत्क
र्षासहिष्णुताशीलाः नाद्रियंते तावता का क्षतिः। तदुक्तं सम्यङ्निरूपितमिदं यदि नाद्रियंते दुष्टा निकृष्टमतयो हृदि मत्सरेण॥ किं तावता ज्वरव
तामरुचेर्न जातु दुग्धस्य शुद्धमधुरस्य विद्वेषणं स्यादिति। परंतु ते वा विद्वद्भाभासत्वमेव संभावयंतीत्यलमनल्पजल्पनेन॥२॥ यस्य देवे
पराभक्तिर्यथा देवे तथा गुरौ॥ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति श्रुत्या कर्तव्यत्वेन समधिगतमथ चिकीर्षितनिर्बंधप्रतिबंध
कप्रत्यूहव्यूहतिमिरपटलकपाटपाटनपटुतरं गुरुवंदनमाचरति। वंद इति। अशेषान्गुरूनित्यन्वयः। यद्यपि पूर्वं कृतमेव गुरुवंदन
मथापि गुरुकृपादृष्टिवशादेवाधिगताखिलविद्यत्वात् स्वस्य कृतज्ञताशिरोमणितास्फोरणाय तदध्यासस्तूचनेन पुनरुक्तिशंकापंकान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वतारान्निष्कलंकमेनत्। वेदवेदांगानां निखिलतंत्राणां च येउपदेष्टारः तावत्संग्रहार्थमत्रोपानिति। कीदृशान्गुरून्। श्रियायुक्तो हरिः श्रीहरिः
लक्ष्मीनृसिंहस्तस्य पादसेवरे श्रीहरिपादपंकजरसस्यास्वादलिप्सामानसानुर्वीमंडलमंडनायितयशोराशीन्नशेषान्गुरून्॥ दंतिद्योतिदिवाप्रदीप
॥ विरुदप्रख्यानविख्यातिकान्वादावादिभिरस्तशान्तवस्तुधीवादप्रभेदप्रभावान्॥७॥ पादौ तावेव पंकजे तयोः रसः तस्य यास्तआस्वादनेरस
चबिस्सासामाजिकानामित्यत्र चबेल्गापदस्यवयास्तपरस्याप्युपयुक्तार्थपर्यवसानात्। नत्रालिवन्मानसंवेषां तान्। ननु हद्रेरवताराभि
शेषाः रामकृष्णाद्यवतारे ष्वपि हरिशब्दस्योपलब्धेस्तेभ्यो व्यतिरिच्य कथमत्र हरिशब्दो नृसिंहपर इति चेत्सत्यं शिवनृसिंहयोरभेदप्रतिपा
दिकायाः श्रुतेः सत्यं परंब्रह्मपुरुषं नृकेसरिविग्रहं कृष्णपिंगलमूर्ध्वरेतसं विरूपाक्षं शंकरं नीललोहितमुमापतिं पशुपतिं पिनाकिनं ह्यु
मितद्युतिमित्याद्युपनिषदि शिवनृसिंहयोरूपान्तत्वेन शिववंदनानन्तरं नृसिंहस्यैवोपादानमुचितं सन्निहितासन्निहितयोः सन्निहिते
स्यैव ग्रहणमिति न्यायात्। तस्मादत्र हरिशब्दो नृसिंहपर एव। अथ हरेरवतारान्पारमार्थिकमभेदमजानानाः इममर्थमसहमानाः केचि
त्तयवलं बिनो हरिशब्दमेपि विप्रुन्वानाः केलकलायमानारामकृष्णा हयापासकाश्चेत्तेषां पुनराक्षिपति ननु भो भगवदवतारान्तराणामवज्ञा
नोचितामहतामित्येनदर्थमर्थान्तरमुपन्यस्यते। हरीन्मृगान्पातिरक्षतीति हरिपंचननंतरादनेनिवासत्वेनेति हरिपादो वाराहो नृसिंहश्च।
हरिरिंद्रः तं पिबतियसतीति हरिपो बलिः तस्माद्दारदत्ते पोदच्च यमिति शेषः हरिपादो वामनः॥ मूलविभुजादित्वात्कः। इरत्यन्येषां धनानि अन्या
येनेति हरयस्तस्करादयः तान् पिबंतीति हरिपा राजानः तानासमंततोनिः शेषतया द्युतिखंडयतीति हरिपादः परशुरामः। हरयो वानरास्तान्
पिबतीति हरिपः कुंभकर्णस्तमनीति हरिपादो रामचंद्रः। हरीन्वानरान्पातिरक्षतीति हरिपो द्विविदः तमासमंतात्द्युतिखंडयतीति हरि
पादो बलभद्रः। हरिः वाजिरूपधरः केशी तं पातिरक्षतीति हरिपः कंसः तमासमंतात्द्युतिखंडयतीति हरिपादः श्रीकृष्णः। हरिं सूर्यं पिबतिग्रस
तीति हरिपो राहुः तमासमंतात्द्युतिखंडयतीति हरिपादो महाविष्णुः। एकशेषः हरिपादाः। पंकाज्जातौ पंकजौ मत्स्यकूर्मौ। न च केवलयोगिकार्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥का०टि०
॥४॥

बोधंप्रतिरूढार्थज्ञानस्य प्रतिबंधकत्वात्कथं न दोषः। न दुष्टं रूढिर्योगमपहरतीति वाच्यं। एतादृशप्रतिबध्यप्रतिबंधकभावस्याशमासिक
त्वं व्यवस्थाप्यचिंतामणिकृता सत्तितात्पर्ये केवलयौगिकार्थबोधस्याप्यंगीकारादिति दिक्। हरिपादानांपंकजयोर्भ्रमरसः भजनरूपस्तस्य
यासन आस्वादनेन तत्रालिवन्मानसं येषां ते नित्यधियः। एतेन सर्वे वक्तारः संगृहीताः। बुद्धस्य नास्तिकत्ववर्तेकत्वात्कल्पैरपि भावित्वान्न ग्रहणं
मित्यलं विस्तरेण। उर्वी पृथ्वी तस्या मंडलं भूलधिवलयांतर्वर्तिनं तस्य मंडनमिवाचरितो मंडनायितः अलंकारभूत इति यावत्। एवंभूतो
यशोराशिर्येषां तान्। दंतिनिहस्तिनि घातीति तातः प्रकाशः सोऽस्यास्तीति तथा एतादृशो यो दिवाप्रदीपः सच्चासौ विरुदः यशः सपादकवस्तुवि
शेषः। विरुदशब्दः इंगलादिशोद्भवदेशीयः शब्दो वस्तुविशेषः प्रकृते दिवाप्रदीप इव तेन प्रख्याता विख्याता निर्येषां तान्। वादेन वादेन प्रवृ
त्तयुद्धं वादावादि तेन निरस्ताः शात्रवसुधीवादप्रभेदप्रभायैस्तान्। शात्रवाः शात्रवः दस्युशात्रवशात्रव इत्यमरः। तादृशायेसुधि
यस्तत्पक्षवादप्रभेदाः जल्पवितंडादयस्तेषां प्रभास्फूर्तय इत्यर्थः। शार्दूलविक्रीडितं वृत्तं। सूर्याश्वैर्मसजाः स्तताः सगुरवः शार्दूलविक्री
डितमिति तल्लक्षणात्। मसजसततगुरुभिः पादे द्वादशसप्तमयोर्यतौ शार्दूलविक्रीडितमिति तदर्थः। मो भूमिस्त्रिगुरुः श्रियं दिशतु
वो यः शं जलं चादिलो भश्च श्रेयस्त्राउज्ज्वलं मुखगुरुर्नो नाक आयुस्थिलः। तो व्योमांतलघुः धनं तिनवरि रोजो कोरुजं मध्यगुरो ग्निर्मध्यलघु
र्विनाशमनिलो देशांतरं सोंत्यगुरुरिति मगणादीनां लक्षणं फलं चावधेयं॥ अथ यशोवृत्तेनेपूर्वकं स्वपितरं नमस्यन्निर्थीकौडिन्यति। श्रियायो
तः रामभट्टः श्रीरामभट्टः स्तस्य वायुहणोः अग्रगण्य इति यावत्। ध्वजयतसर्वोत्कर्षेण वर्तेत। एतावता सर्वोत्कृष्टशालिता शालित्वप्रतिपा
दनेन स्वस्य सर्वातिशेततया स्वावधिकौत्कृष्टता प्रतीत्या मानसप्रणतिरूपं मंगलमावेदितं। कथंभूतः श्रीकौण्डिन्यस्य मुनेः महातपोध
नं यत्कुलं तदेव क्षीरांबुराशिः तस्य स्फुरंश्चासौ राकेशीवरबंधुः पूर्णिमाचंद्रः पूर्णचंद्रस्य समुद्रवृद्धिकरत्वं प्रसिद्धं। आजलनिधेः जलनि
धिमभिव्याप्य विख्यातं यन्नाम तेनांकितः स्वनामैकमुद्र इति यावत्। नानाग्रंथानां निबंधनैर्निर्माणैस्तस्मिन्नेकनिपुणः अद्वितीयेन पुण्य

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शाली। गौतमस्य कणादस्य कापिलस्य पतंजलेः। व्यासस्य जैमिनेश्चापि दर्शनानि षडेव हि। षण्णां दर्शनानां समाहारः षड्दर्शनी तस्याः संपत्सिद्धां
॥ श्रीकौण्डिन्यमहातपोधनकुलक्षीराम्बुराशिस्फुरद्राकेंदीवरबंधुराजलनिधेर्विख्यातनाम्नः किल॥ नानाग्रंथनिबंधनैकनिपुणः षड्दर्शनीसंपद्गाढो
॥ लिंगितमानसो विजयते श्रीरामभद्राह्वयः॥ ८॥ ॥ तज्ज्ञानेन योगाद्वयवाप्त्या तथा आलिंगितं मानसं यस्य सतथा। अथवा षड्दर्शनान्यस्य संतीति
षड्दर्शनी तामिर्निन्नेपदं। मत्वर्थीय इनिः। न च नकर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर इति सूत्रविरोधात्कथं सोऽपुते इति वाच्यं। अशुद्ध
तद्इतिमहाभाष्यप्रयोगेण रशीतच्युतेः प्रायिकत्वकल्पनेन न तस्याधुनाया निर्विवारत्वात्। संपराब्रह्मविद्यारूपया। अन्यत्पूर्ववत्। गाढपरेनव
शाब्दिकेषु विशेषो नास्तीति दर्शितं। वेदवेदांगाध्ययनस्य च बाल्यत्वेन निष्कारणो धर्मः षडंगो वेदोऽध्येयो ज्ञेय इत्यादिश्रुतिविहितत्वेन व्याकरणा
ध्ययनादिवेदाध्ययनमिव नित्यप्राप्तत्वात्तस्य वेतिनतरकथनन्यूनतेति ध्येयं। शार्दूलविक्रीडितं छंदः॥ ९॥ प्रख्यातामवधानाय स्वयं यस्योत्कर्षे
दर्शयन्नतिजानीते श्रीरामभद्रतनय इति। सुधीः काशिकातिलकं कुरुते इत्यन्वयः। कथंभूतः घनेनिबिडे दुरवगाहमिति यावत्। अतिरभसकरा
लकालवदनगभीरतरदरीदरीदृश्यमाननरनिकरत्रिविधतापदवदहनदवरीभूज्यमानद्विजदनुजविलोकनेजातनिर्वेदस्य तत्वजिज्ञासोरधिकारिणः
॥ श्रीरामभद्रतनयोघनसांख्ययोगसत्तर्कतंत्रमुखतंत्रगणस्वतंत्रः॥ श्रीमन्नृहसिंहपरिपालितवंशसिंधुदुर्गेंदुरायनुतकीर्तिलसत्कवींद्रः॥ १०॥
॥ विश्वनाथपदांभोजमरंदास्वादलोलुपः॥ काशिकातिलकं शंभोः प्रीतये कुरुते सुधीः॥ ११॥ दृष्टमानागममहमालानव्यजनितव्यक्ताव्यक्तज्ञविज्ञान
हेतुकेसत्वपुरुषान्यताख्यप्रत्ययतरधीनदुःखत्रयानिवृत्तिसत्कार्यपक्षप्रधानकारणपुरुषबहुत्वप्रधानपुरुषाणादित्वप्रतिपादकः। एताद्दृशायत्सांख्य
सांख्यशास्त्रं योगः योगशास्त्रं सत्तर्कतंत्रं वैशेषिकशास्त्रं एतान्येव मुखानि प्रधानानि येषां तानि तंत्राणि शास्त्राणि तेषां समूहस्तस्मिन्स्वतंत्रः कल्पकः
सदसद्विवेककरणेकधुरीण इति यावत्। अतएव श्रीमन्नृहसिंहेन परिपालितो यो वंशः पाल्योपनामकः कौण्डिन्यवंशः एतावता स्वकुलदेवतालक्ष्मीनृ
सिंहस्तत्प्रीतिः सूचितः। एतादृशो वंश एव सिंधुस्तस्य दुर्गेंदुः दुर्गेचंद्रः आल्हादकत्वात् वृद्धिकरत्वात्। आर्यैर्नुता या कीर्तिस्तया लसत्कवींद्रः। एतादृशापंडि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेंदुकृतत्वमत्रोत्कर्षः। वसंततिलका वृत्तं। उक्ता वसंततिलका तभजाजगौ गः। तिलकसंज्ञं तत्। तभजजगगैः वसंततिलका स्यादित्यर्थः। न च पा
दात्याथ रस्या गुरुत्वात्कथमिदमिति वाच्यं। संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंमिश्रं। विसंयमसंयुक्तपादान्तस्थं विकल्पेनेत्युक्तत्वेनादोषात् इति
दिक्। सुधीः श्रीनीलकंठभट्टः। कथंभूतः सन् काशिकातिलकं करोतीत्याकांक्षायामाह। विश्वनाथेति। विश्वनाथपदांभोजमरंदास्वादलोलुप
आसक्तः सन्नित्यर्थः काशिकातिलकमिति ग्रंथस्यान्वर्थनाम। कथमिदमिति चेदित्थं। कं सुखमाप्नाययति भोजयति आश्रितजनानिति काशी
अत एवानंतानि शु। यद्वा अयोध्यादिपुरीभ्योऽधिकतया काशते प्रकाशते इति काशी। ननूक्तं काशीखंडे अन्यानि पुराणि सेचालि काशीप्राप्तिकरा
णिवेद्रति। अथवा काशते आनंदरूपतया राजते इति स्यान्निर्विलयागमात्रेण शालिनेह इति काशी। इदमप्युक्तं तत्रैव। कीटाः पतंगा मशकाश्च
वृक्षा जले स्थले ये विचरंति जीवाः। अस्मिन्नु कमतस्याः क्रिमयोऽपि काश्यां त्यक्त्वा शरीरं शिवमाप्नुवंतीति। पिप्पल्यादेराकृतिगणत्वात् ङीप्। का
श्येव काशिका तस्यास्तिलकमिति। अथवा तस्यां तिलतिलप्रमाणेऽपि यत्कं सुखमानंदकानंतता। यद्वा कं ब्रह्म कं ब्रह्म खं ब्रह्मेत्यादिश्रुतेः सं
लीनेक निलिंगानि वाराणस्यां तिले तिले इत्यादिना लिंगानि व्यवस्थापनेनापि ब्रह्मस्वरूपत्वप्रतिपादनात्। अपि वा काशिकैव तिलकं व्यापकं ब्रह्म
कारया ज्योतिर्लिंगत्वेन प्रतिपादितत्वात्। तत्प्रतिपादकं ग्रंथस्यापि तद्रूपत्वं मोपचारिकं। काश्यां ज्योतिर्लिंगस्वरूपत्वादनन्त्य वृक्षादिवर्णनमपि ब्रु
नि परब्रह्मरूपमेवेति सर्वं चतुरस्रं।।६।। अथ कथाप्रस्तावः।। ।।कुबेरः शिवपूजार्थं कैलासं गंतुमिच्छया।। प्रयत्नं कारयामास भट्टैः कार्यपरायणैः।।७।।
तस्मिन्काले तु भगवान्नारदो मुनिपुंगवः।। आगत्य चाब्रवीद्वाक्यं कृतार्थं किन्नरेश्वर।।८।। ।।कुबेर इति। शिवपूजार्थं कैलासं गंतुमिच्छया कुबेरः
कार्यपरायणैः कार्योद्यतैः भट्टैः भृत्यैः। भटशब्दस्य योद्धृवाचकस्यापि भरद्वाजः सोऽयं भृकुटिभट्टकल्पाखिलसुरभोजनं कृत्य सामान्येऽपि श्रूय
कैलासात् प्रयत्नं वाहनाद्युद्योगं कारयामास।।७।। तस्मिन्निति। तस्मिन्नेव काले भगवान्। उत्पत्तिं च विनाशं च भूतानामागतिं गतिं। वेत्ति विद्यां च
विद्यां च स वाच्यो भगवानिति। अत एव मुनिपुंगवः मुनिश्रेष्ठः नारदः आगत्य किन्नराणामीश्वरं कुबेरं वाक्यं वक्ष्यमाणं अब्रवीत्। किन्नरेश्वर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्याकथितं चेत्यनेन कर्मत्वाद् द्वयोर्द्विकर्मता। कथंभूतं किन्नरेश्वरं कृतार्चं कृतार्चा अर्चा येन अर्थान्नारदस्य येन नमित्यर्थः॥८५॥ अहो इति। सद्य शिव
स्य येषु परं पारो परं ववसित चोलि स्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः। तेन वारविंदलयो मेरंदः तस्यास्वादविलसन्मिलिंदायमानभ्रमरतुल्या। अहो राजरा
जकुबेर। अरविंदनेत्र नो ब्रुवासं केदनंदः तत्र सुरवाः वंदारवो वृंदारकादेवास्ते षाम नीकसमूहस्तस्य मुकुटानां नरत्नि पुलुठंतिया नि अनूनानि म
हार्घाणि नूत्नानि नूतनानि रत्नानि नूतनो नवः नूत्नश्चेत्यमरः। तान्येव दीपकलिकास्ताभिः निराकृतमयथे ध्वनी राजि चरणारविंदयस्य सतथा
भूतः श्रितजनावनधुरंधरः आश्रितजनरक्षणभारवहनशाली भगवान्। ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चापि षण्णां
भग इतीगनास्त्युक्तत्वात्॥ ॥अहो राजराजसखाशिवपदारविंदमकरंदास्वादविलसन्मिलिंदायमान अरविंदनंदनसकदनप्रभुसवनिखिलवंद
रुवृंदारकानीकमुकुटतटीलुठदर्धेन नूत्नरत्नदीपकलिकानिकायनीराजितचरणारविंदः श्रितजनावनधुरंधरो भगवान् अंधकद्वेषी स्मरारी धर
तीं प्रत्यागच्छदिति हस्तौ तं कथयितुमेव कैलासादिहमागतोऽस्मीति॥ एतच्छ्रुत्वा कुबेरोऽयमाश्चर्यं प्राप्तवान्॥ कृताञ्जलिरुवाचेदं मधुरं मृदुलं वचः॥१॥
एतदिति। एतन्नारदवचः श्रुत्वायं कुबेरः। नच कुबेरस्यायं धर्मः सन्निकृष्टत्वादिदंशब्दस्य च सन्निकृष्टवाचित्वात् कथमयमित्ययुक्त्या निर्देश
तदुक्तं। इदमस्तु सन्निकृष्टे समीपतरवर्तिचैतदो रूपं। अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयादिति वाच्यं। तस्य बुद्ध्या सन्निधापितत्वेन त
थानिर्देशस्य समंजसत्वात्। कृताञ्जलिः सन्निरवक्ष्यमाणं मधुरसरसमृदुलं कोमलं वचउवाच॥१॥ शिवार्चनायकैलासं प्रतिजिगमिषोर्म
मप्रयत्नेनात्वायथावारयितुमागतः तथा शिवस्यापि स्वस्तांतेऽनात्ययं नारदः सर्वज्ञत्वादिति मनसि कृत्य कुबेरः पृच्छति। अहो नारदेति। कृप
येति। एतावता कथने हेतुरन्यो नास्तीति सूचितं। स्वस्य श्रवणाधिकारिताम भिव्यनक्ति। दर्शने ध्यावतइति। शिवदर्शनविषयकेध्यावनेइत्यर्थः
ममेति संबंधसामान्ये षष्ठी॥१०॥ इत्युक्तेति। मनीषावान् प्रशस्तबुद्धिमान् अत एव मुनिपुंगवो नारदः विस्मितं इत्युक्तवतं कृपया अहोत्यु
क्तवंतं धनदं कुबेरं अशेषासमग्राभ्यां वाचं आह स्म। विस्मितं यथा स्यात्तथा आहेति क्रियाविशेषणं वा। ध्रुवः पंचानामादित आहो ध्रुव इति सू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अहो नारद सर्वज्ञ किमर्थं गतवान्हरः॥ कृपया ब्रूहि तत्सर्वं दर्शने धावतो मम॥१०॥ इत्युक्तवंतं धनदं नारदो मुनिपुंगवः॥ मनीषावान्शेषां
च भाषां भाषस्व विस्मितं॥११॥ अविमुक्ते पुरे रम्ये लोकानां मुक्तिदायके॥ सहदेवैर्माधवाद्यैरगच्छत्पार्वतीपतिः॥१२॥ ॥नेगलट्स्थानिकपरस्मैपदस्य
गालिङ्गुवः आहौ देशे च कृते निष्पन्नमेतदिति। अब्रवीदित्यर्थे लट् स्मे इति सूत्रेण लट्॥१३॥ तां भाषां प्रदर्शयति। अविमुक्ते इति। रम्ये रमणीये लोकानां नि-
खिलप्राणिनां मुक्तिदायके अविमुक्ते पुरे माधवाद्यैर्देवैः सह पार्वतीपतिरगच्छत् गतवानित्यर्थः। विमुक्तेन भवतीत्यविमुक्तं स्वयं मुक्तिरहितम
पि लोकानां मुक्तिदायकमिति विरोधः। शिवेन प्रलयकालेपि मुक्तत्यक्तेन भवतीत्यविमुक्तमिति विरोधपरिहाराद्विरोधाभासालंकारः। अथवा वि-
शेषेण मुक्ता विमुक्ताः न विद्यंते विमुक्ता यस्मिंस्तद्ध्यविमुक्तमिति विरोधः। न विद्यंते विमुक्ताः मुक्तिरहिता यस्मिंस्तदविमुक्तमिति तत्परिहाराद्विरो-
धाभासः॥१४॥ किमर्थमिति प्रश्नस्योत्तरं तारकोपदेशायेति। कथंभूताय परमानंदहेतवे। ब्रह्मसाक्षात्कारसंपादनेन निरतिशयानंदावाप्ति-
कारणायेत्यर्थः। तथा च श्रुतिः। अत्र हि जंतोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मोक्षी भवति तस्मादविमुक्तमेव
निषेवेताविमुक्तं न विमुंचेदिति। एतेन मोक्षं प्रति तत्त्वज्ञानस्यैव कारणता नान्यथा। तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेयनाय ज्ञानादे
॥श्रीतारकोपदेशाय परमानंदहेतवे॥ असारभूतसंसारतमःपटलभानवे॥१५॥ ॥वस्तुकैवल्यमित्यादिश्लोकेषु एवकारेण कारणांतरस्य निराकृ-
तत्वात्। तत्कथं काशीपुरस्य मुक्तिदायकत्वमिति चेदस्यानवकाशः। काशीपुरस्य तत्त्वज्ञानसंपादनेनैव मोक्षहेतुत्वस्य प्रदर्शितत्वात्। ननु विना संसा-
रनिवृत्तिं परमानंदावाप्तिः कथमित्याशंक्य प्रसंग्याधावरकाज्ञानस्य तत्कार्यभूतस्य च कल्पितरजतादेः शुक्तिज्ञानेनेव सच्चिदानंदावरकाविद्याया
स्तत्कार्यस्य च मिथ्याभूतसंसारस्य तत्त्वसाक्षात्कारेण निवृत्तिर्भवत्येवेत्याह। असारभूतेति। मिथ्याभूतो यः संसारः कर्तृत्वभोक्तृत्वादिरूपबंधः
स एव तमःपटलं तस्य भानवे सूर्याय यथा सूर्योदयसमकालमेव सर्वतमसामनायासेनैव नाशः समस्तवस्तुप्रकाशश्च। तथा तारकोपदेशे-
न तत्त्वसाक्षात्कारे संसारनिवृत्तिः परमानंदस्वप्रकाशश्चेति। ननु अनेककल्पपरिकल्पितानां नानाविधभोगभोगायतननिदानभूतानामपरिमितसं-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चितकर्मणां सद्भावात्तद्भोगमन्तरा कथमवान्तरा कस्मिंश्चित्काले शरीरपातानन्तरमेव मुक्तिः। ननु उक्तं नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि। अवश्यमेव भो
क्तव्यं कृतं कर्म शुभाशुभमिति चेत् अत्र वदन्त्यभिज्ञाः। तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवमेवास्य सर्वे पाप्मानः प्रदूयन्त इति श्रूयते। न च तर्हि
पापकर्मणामेव विलयो न पुण्यकर्मणामिति शङ्क्यं। ब्रह्मलोकादीनां शरीराणामिव श्वसूकरशरीरवत्तः यतो जिहासितत्वान्नितरां तस्मादुभे अपि पापपुण्ये इति
वचनात् पुण्यकर्मणः आनन्दब्रह्मलोकादिशरीराणां पापकर्मणः श्वसूकरादिशरीरवत् जिहासितत्वाविशेषात्पुण्यस्यापि कर्मणः पापत्वेन
कीर्तनात्। किं च तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति क्षीयन्तेऽस्य कर्माणि तस्मिन् दृष्टे परावरे। ज्ञानाग्निः
सर्वकर्माणि भस्मसात्कुरुतेऽर्जुनेति च प्रसिद्धं तथा च तत्त्वज्ञानेन सर्वकर्मणां नाश इति संक्षेपः। अत्र हि जितो रित्यादिश्रुतेरयमर्थः। अत्र अवि
मुक्तेऽस्मिन्नैजतोः ज्ञातिमात्रस्य ज्ञाते पुत्रकमभार्ये सत्सु रुदः रुदता पत्रयात्मनि दुःखं दुःखहेतुं वा द्रावयतीति रुद्रः। रुद्रः दुःखं दुःखहेतुं वा विद्राव
यति नः प्रभुः रुद्र इत्युच्यते सद्भिः शिवैः परमकारणमिति स्मृतेः। तारकं तारयतीति तारः प्रणवः स्वार्थे कः एतादृशं ब्रह्मव्याचष्टे उपदिशति।
ओमित्येकाक्षरं ब्रह्मेत्यादिविवक्षार्थयोस्तादात्म्यं। येनउपदिष्टेन ज्ञानेन नासौ जन्तुरमृती भूत्वा निरूपणाविनात् कार्यस्य मोक्षी भवतीति। न
न्वन्यस्थानकृतानां पापानां मूलच्छेदमनुमन्यामहे काश्यां तु कृतानां पापानां वाराणस्यां कृतं पापं वज्रलेपो भविष्यतीति दुष्परिहार्यत्वप्रतिपाद
नात् ब्रह्महत्यादिपापानां सम्मीनामयुक्तमेवेत्यनेन न केवलं बन्धे रत्वा व गमात् यातनानां तेऽदृशोऽन्यानितिमित्या रुद्रपिनाकाधीरवैरे भोगे कनामयत्वबोधना
च्च शालैः कर्मणामनन्तरं पापभोगस्तदनन्तरं तारकोपदेशस्तस्तो मुक्तिरित्येवमेवं च प्राले शुक्लकर्मनाशेऽपि त्वन्वशातीतं ज्ञानेन कर्मणां कालीकृतं तारको
पदेशस्य कथं संबोधो भवतीति चेदत्र प्रवदन्ति तत्त्वविदः। यद्यपि श्रुतिस्मृत्योर्विरोधे श्रुतेर्बलीयस्त्वात् प्रारब्धशरीरस्थैव तेषां पापानां भोक्तव्य
त्वं कल्प्यते तु शक्यते काश्यां कृतानां पुण्यपापानामत्युत्कटत्वात् अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुत इति वचनात् तथा वर्तमानशरी
रे कृतानामखिलपुण्यपापानां तथा मिगानियमदर्शनेन भैरवयातनाप्रतिपादकानेकवचनाविरोधेन च श्रुतिस्मृत्योरित्थं विरोधपरिहारः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वज्ञः सर्वशक्तिः सर्वान्तरयामी परमकारुणिकः परमेश्वरः स्वाधीनमायया प्राणप्रयाणसमयात् पूर्वं क्षणेनैकेनानेककालिकैष्यानिष्टकर्मफलो
पभोगयोग्यं शरीरं परिकल्प्य तदनुप्रवेशानुभवमुद्राव्यस्वप्नकल्पानिष्टानिष्टभोगाननुभाव्य पश्चात् स्वतः सिद्धं सच्चिदानन्दात्मकमात्मानमव
गमयतीति। न दुक्तं काशीखण्डे। कृत्वा कर्माण्यनेकानि कल्याणानीतराणि वा॥ तानि क्षणात्समुत्क्षिप्य काश्यां संस्थो मृतो भवेदिति॥ न च क्षणिक
भोगस्य कथमनेककल्पभोगवदवभास इति भ्रमितव्यम्। अघटितघटनापटीयस्या हि भगवन्मायया सर्वमिदं संघटतीति। मायाविमोहिता
नां क्षणेनैकेन विग्रहान्तरपरिग्रहाद्विचित्राश्चानुभवास्तत्रतत्र श्रूयते। तथा हि। नारदः कदाचिद्भगवन्मायया विमोहितः कन्यात्वमाप। तस्याः
पाणिं कश्चिदग्रहीत् सा च पुत्रान्बहून् असूत तत्र सा सारिकं च दुःखमनेककालिकमन्वभूत पतिसुतवियोगजशोकेन पुनर्नारद एवासीदिति
स्कन्दपुराणे। तथा लवणो नाम कश्चिद्राजा मन्त्रिसामन्तनृपतिभृत्यस्यासभामध्यासिंहासनस्थः क्षणं चिन्मायाविनाविमोहितस्तदीयमायया च
दर्शितमश्वरत्नमधिरुह्य समस्तां पृथ्वीं बभ्राम। अथ जवितानेन पातितः कस्मिंश्चिद्विजने क्षुत्तृषापरिपीडितश्चासीत्। ततश्चाण्डालक
न्यकां कांचिदरण्ये कंचिद्घापारं कुर्वतः पितुः कृते पानीयमन्नं चादाय गच्छतीमपश्यत् तेन दानं दातिकमुपसृत्याब्रवीत् क्षुत्पिपासार्दितस्य
मे स्तोकमन्नं पानीयं च देहीति। सा चैनमुवाच त्वं चेन्मम भर्ता भविष्यसि तर्हि दास्यामीति। स तथेत्यभ्युपगम्यान्नैकदेशं भक्षयन् पानीयं
चापिबत् अनन्तरं सा पितुरन्तिकं नीत्वा वृत्तान्तमावेदयत् तेनानुज्ञाता भाविना भर्त्रा सा स्वभवनमायासीत् मातृभ्रातृप्रभृतीनां चैनमदर्शयत्
ते चाभ्यनन्दन् अयमुद्वाहविधिना गृहीत्वा तया सह चिरकालमुवास तस्यां पुत्रान्बहूनुदपादयत्। अथ पुनःकाले नगरं प्राप्ते दुर्भिक्षोपहते
स्तद्देशात्तया भार्यया ताभिः प्रजाभिश्च सह देशान्तरं गमयासीत् क्वचिन्निर्जनप्रदेशे कस्मिंश्चिद्वृक्षमूले क्षुत्पिपासार्दिताभिः प्रजाभिर्भार्यया च
नर साकं परिश्रान्तो शयीष्ट हे तात तातान्नं पानीयं च देहीति शिशुभिः प्रार्थ्यमानस्तेभ्यस्तदानीं तद्दातुमुपायं कंचिदलभमानस्तेषामार्तिपरं वचः सोढु
मशक्नुवन् स्वनात्काष्ठान्याहृत्य प्रज्वाल्य पक्वशरीरं मे ते भक्षयन्त्विति बुद्ध्या ज्वालाजटिलमग्निं प्राविशत् ततः क्षणादुन्मील्याक्षिणी विस्मया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चित्रगुप्ताक्षलेनैकेनन द्दत्तं मंत्रिसामंतेभ्यः कथयामासेति कथा वाशिष्टरामायणे। एवं भैरवयातनापि नानुभवत्यत्र माया मय एवेत्यभ्युपेत
व्यं। अथैवं काश्यां त्यक्ततनूनापि पिशाचानां च भूतानां तत्कृतकार्येण भुवि विवादमुपलब्धेः। कथं तदपलाप इति चेदत्रेदृशः काश्यां तनुत्यागवतामव्यव
धानेन मुक्तिरेव न पिशाचरूपता नंतव्याप्तिप्रारब्धवशेन मायामया नापि पिशाचानां कल्पनं संभवात्। न च पापकर्मणः काश्यां तनुत्यागेपि न संभ
वतीति शंक्यं। यतो भवानेकस्मिन्नेव जन्मनि पुण्यपापयोः कथंचित्परिछेत्ता अनादिसंसारे कृतानां सुकृतदुष्कृतानां परिछेत्ता सर्वज्ञः परमेश्वरएव
वतस्माज्जन्मांतरकृतसुकृतपरिपाकवशात्काशीप्राप्तिरिति। तथाचोक्तं स्कंदे नागस्त्यं प्रति। न ज्ञायते सूक्ष्मतरं हि किंचित्कर्मास्ति लोके कस्य सुदु
र्विभाव्यं। यस्तादियोगादितपोभिरुग्रैर्युक्तस्य ते संप्रति नास्ति काशी॥ न ज्ञायते कस्य किमस्ति पुण्यं स्वल्पोपि काश्यां न नु वृत्तस्तदास्ति इति। तस्मादवि
मुक्ते पुरं मुक्तिरमित्यनवद्यं। अहो जनानां जडता विहाय काशीं यदन्यत्र नयंति चेतः॥ परिस्फुरद्गंगजलाभिरामा कामारिशूलाग्रधृतालयेपि। ना
मसीं प्रकृतिं प्राप्य कालो भूत्वा चराचरं। यस्मिन्लीलयाप्यविकाशीं रक्षामि यत्नतः इत्यादि प्रलयेपि काशी सद्भावे प्रमाणं। ननु दैनंदिनप्रलयेभूला
म ग्रेणोद्धृतत्वात्कथंचित्काशीति छतु नो प्राकृतेनु प्रलये प्रकृतिकार्यमात्रस्य विलयात्कथं सा तिष्ठति तस्मादेतदर्थवादमात्रमिति चेन्न। नहि काश्यादि
कंपाकृतं किंत्वचित्यशुद्धसत्वात्मकं लोकानुग्रहार्थं व्यक्तीभावमापन्नं श्रीकृष्णशरीरवत्। न चास्ति देहेंद्रियांतः नराकृति परब्रह्मेत्यादि वचनैरवच
नविरोधात्। नचैवोक्तं। केवल्यं यत्परब्रह्म निराकारमगोचरं। न ब्रह्म मूर्त्या परिणतं भक्तानां भक्तिहेतुतः इति। उपनिषदर्थ उल्लंखले निबद्ध मिति च।
न च शरीरत्वात्पांचभौतिकत्वमनुमेयमिति वाच्यं। कर्मजन्यत्वस्योपाधित्वात्। पुराणेष्वर्थवादत्वं ये वदंति नराधमाः। तैरर्जितानि पुण्यानि नद्द
देव भवंति हि। अहो हि वाक्ये चतुरक्षरे हि पुण्यस्य पापस्य निदानभूते। उच्चारणोद्देवनरेणमुनीद्रा नारायणश्चेति तथार्थवादः। पुराणमन्यथाकृ
त्वा तिर्यग्योनिमवाप्नुयात्। सुशांतो सुदांतोपि न गतिं प्राप्नुयात्क्वचित्। चतुर्दशासु विद्यासु पुराणं परमश्रुतमः। अंधोपि न नरो लोकात्संसाराद्धी
धीं चित्तसतेतरा। श्रोतव्यानि पुराणानि वक्तव्यं जाह्नवीतटे इत्यादिना पुराणानां प्रमाणत्वस्य च निश्चितत्वात्। भूमित्वेन प्रतीयमानापि काशी भूनेभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

15

वति स्वप्रकाशापरब्रह्मरूपत्वात् । यथा देवस्यापुदरस्थत्वेनुभासमानोपि श्रीकृष्णः तत्स्थ्याभिन्नो भवति । तदुक्तं । अविमुक्तं महाक्षेत्रं पंचक्रोशीपरि
मितं । ज्योतिर्लिंगं हि तत्क्षेत्रं परं विश्वेश्वराभिधं ॥ यल्लिंगं दृष्टवंतौ तौ नारायणपितामहौ । तदेव लोके वेदे च काशीति परिगीयते । सात्वासेनस्य माहा
त्म्यं यो वसेत्कृतनिश्चयः । तं नारयति विश्वेशो जीवंतमथवा मृतं । जन्मांतरसहस्रेषु यत्पुण्यं समुपार्जितं । तत्पुण्यपरिवर्तेन काश्यां वासो च लभ्यते ।
लब्धोपि सिद्धिं नो याया यदि क्रुद्धस्त्रिलोचनः । तस्माद्विश्वेश्वरं नित्यं शरण्यं शरणं व्रजेदिति ॥ १३ ॥ कुबेरो ब्रूते अहो इति । यशसा निर्जितः शारदनीर
दोः शारत्कालसंबंधि मेघो येन सः । किं च मनीषया बुद्ध्या तिरस्कृतः धिषणो येन सः बृहस्पतिर्येन सः । एतादृशा नारदः । नारदम्प्यमिदं नारम ज्ञान
तत् द्यतिखंडयतीति नारदः । नरा एषामिदं नारं ज्ञानं तद्ददातीति वा । अथवा नरस्यात्मादत्ते देशकालवस्तुपरिछेदमिति नरः परमात्मा । अत्र नञ् समाना
र्थो न शब्दः । नर एव नारः तं रदति स्वभक्तेभ्यो बलविघोपदेशेनेति नारदः तस्य संबोधनं । अशेषः समस्तः यस्तावकीनभावाविशेषः तत्तदीयवाक्यविशेषः
॥ अहो यशोनिर्जितशारदनीरदनारदमनीषातिरस्कृतधिषणाशेषतावकीनभाषाविशेषसंपादितेन द्विषयमनीषाविशेषोहमिति संतुतोषा । नरा
नीमेवो शृंगारशेखरो वीरो काशीदर्शनकांक्षितो । सौंदर्यनिर्जितानंगो शिवपूजाधुरंधरो ॥ १४ ॥ आगत्य तावद्वादिष्वां किन्नरो यक्षनायकं । राजन्नत्र म
तिं देहि गच्छावो धरणीं प्रति ॥ १५ ॥ एतेन संपादित एतद्विषयः काशीविषयकः मनीषाविशेषः विलक्षणबुद्धिः यस्य एतादृशोहमस्मीति संतुतोष
संतोषं प्राप्तवान् । शृंगारशेखरो शृंगारप्रधानो सौंदर्येणानिर्जितो नंगः कामो याभ्यां एतादृशो किन्नरो तदानीमेवागत्य यक्षनायकं अवादिषातां उक्त
वंतो । किमित्याकांक्षायामाह राजन्निति ॥ १५ ॥ तस्य कुबेरस्य ॥ १६ ॥ तत्र तयोर्मध्ये वसंतशेखरः अब्रवीत् ॥ १७ ॥ कीदृशं वचः अब्रवीदित्याकांक्षा
यामाह सखे इति ॥ १८ ॥ अर्थगतरसपुष्टतामाशयाह सरसामिति । पदलालित्यमभिव्यनक्ति । मधुरामिति ॥ १९ ॥ वयस्यस्सखे । युवयतः सर
सिरुहभवः ब्रह्मा स्मात्तुमागतः खल्विति । तत्प्रसिद्धं काशीखंडे । सत्यलोकात्सद्दनिदिनं हंसयानः पितामहः । माध्याह्निकीं क्रियां कर्तुं समीयान्मणि
कर्णिकां । मणिकर्ण्यां कृतस्नानो मणिकर्णीशवीक्षणात् । जननीजठरावासे वसमिं नलभेन्नर इति । तत् । तस्मात् । इहहेरदेशे । तत्र गंगातीरे आगत्येति ।

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥तदानीं। तस्यानुज्ञां गृहीत्वा तु किन्नरौ चतुराङ्गमौ। मनुष्यरूपे स्वीकृत्य आगतौ धरणीं प्रति ॥१६॥ तत्र वसंतशेखरो नाम सर्वलक्षणसंयुतः ॥
॥तत्रैव दुर्गशेखरं दृष्ट्वा चाब्रवीन्मधुरं वचः ॥१७॥ सर्वे चित्रमिदं पश्य ब्रह्माद्या निखिलाः सुराः ॥ हंसादिवाहनारूढास्त्वां गच्छन्ति भुवं प्रति ॥१८॥
॥तस्मिन्न च दति सत्येव भोन्तु कं य प्रामवान् बहु ॥ सरसां मधुरां वाणीमवादीद्दुर्गशेखरः ॥१९॥ साधु वयस्य सम्यगुक्तवानसि यत्स्तुतमेवा
॥र्थयसे। शृणु। सरसिरुहभवप्रभृतयो देवाः मणिकर्णिकायास्तानुमागताः खलु। तदिह नचिरेण स्थातव्यमिति। तच्चागत्य गंगां दृष्ट्वा
॥सांजलिबंधा। जयजय॥ ॥वसंतशेखरेण हे दुर्गशेखर इति शेषः। सांजलिबंधमिति। इत्यभ्येत्यैनेनाभिमेण्यान्वयः। जयजय। हे गंगे स
वीतकर्षेण वर्तस्व। आदरात् द्विरुक्तिः। चतुर्मुखो ब्रह्मा। शतं मखा यस्य स शतमखः इंद्रः। मखः क्रतुरित्यमरः। तत्प्रमुखाः ये निखिलाः म
खभुजो देवास्तेषां निकरः समूहः तत्संबंधि शिरस्तटेषु शिरःप्रदेशेषु विद्यमानानि हाटकमयानि सुवर्णमयानि यानि किरीटानि तेषां को
टीषु अग्रभागे सुघटितानि खचितानि रत्नानि नूतनानि यानि रत्नानि तेभ्यो निर्यत्नं यथा तथा निर्यत्यः निःसरंत्यः याः प्रभाः ताभिर्विभासमा
त्सं नेपदकमले यस्यास्तत्संबोधनं। एवमग्रेऽपि। अखंडलक्ष्म्याः प्रदायकं अत एव ब्रह्मादिभिः चिरकांक्षितं कटाक्षजालं अपांगदर्शनपरंपरा यस्या
इत्यर्थः। कमलभवः ब्रह्मा। भवः रुद्रः अथवा कमलभवभवः ब्रह्मपुत्रो नारदः शारदा सरस्वती शारदनीरदः शरत्कालिकमेघः पटीरं चंदनं हीरः
॥चतुर्मुखशतमखप्रमुखनिखिलमखभुङ्निकरशिरस्तटहाटकमयकिरीटकोटीघटितनूतनरत्ननिर्यत्ननिर्यत्प्रभाविभासमानपद
॥कमले॥ अखंडलक्ष्मीप्रदायकचिरकांक्षितकटाक्षजाले॥ कमलभवभवशारदाशारदनीरदपटीरहीरनीहारतिरस्कारणचणसमाख्यासं
॥भरितहरिदंतराले॥ ॥वज्रं नीहारस्तुषारः ते यांतिरस्कारणेन प्रसिद्धा यातेतिरस्कारणचणा तेन वित्तश्चुंचुपूचणपाविति चणप्रत्य
यः। शवं चातिशुभ्रमिति सिद्धं। तादृशी या समाख्या कीर्तिः यशः कीर्तिः समाख्या चेत्यमरः। तया संभरितं सम्यक् पूरितं हरिदंतरालं दिगभ्यंत
रं यये त्यर्थः। दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ता इत्यमरः। करुणारसस्य भाजनीभूतं भाजनं भाजनमिव पात्रमिव संपद्यमानं तथा

16

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का० ति०
॥१॥

एवंभूतेहृदयस्थान्तराले यस्यास्त्यर्थः। यमेत्यादि। अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः। तत्र अहिंसा मनोवाक्कायैः सदा सर्वप्राणिष्वक्लेशजननं।
सत्यं यथार्थकथनरूपं यथार्थाचरणरूपं च। अस्तेयं परस्वापहरणाभावः। स्मरणं स्पर्शनं केलिः प्रेक्षणं गुह्यभाषणं॥ सकल्पोध्यवसाय
श्चक्रियानिष्पत्तिरेव। एतन्मैथुनमष्टांगं प्रवदन्ति मनीषिण इत्यभिहिताष्टांगमैथुनवर्जनं ब्रह्मचर्यं। अपरिग्रहो देहयात्रातिरिक्तभोगसाधना
स्वीकारः। शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः। तत्र शौचं द्विविधं बाह्यमाभ्यन्तरं च। बाह्यं मृज्जलादिभिः कायादिमलक्षालनं।
॥करुणारसभाजनीभूतहृदयान्तराले। यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टांगयोगनिष्ठागरिष्ठवशिष्ठाद्यखिल
॥मुनिजनकनीनिकाकाञ्चनचञ्चरीकामोदसंपादकचरणारविन्दे॥ ॥आन्तरं मैत्र्यादिभिः चित्तमलानां प्रक्षालनं। संतोषः यदृच्छालाभतः तुष्टिः।
तपः कृच्छ्रचान्द्रायणादि। स्वाध्यायः उपनिषदाद्यभ्यासः। ईश्वरप्रणिधानं द्विविधं। अनुष्ठितकर्मणामीश्वरे फलार्पणं प्रणवार्थभावना च। आसनं स्व
स्तिकपद्मासनादि। प्राणायामः पूरककुंभकरेचकरूपः। स द्विविधः सबीजो निर्बीजश्च। आद्यः प्रणवाभ्याससहितः। तद्रहितो परः। प्रत्याहा
रः इन्द्रियाणां विषयेभ्यः प्रातिलोम्येन आहरणं। विषयान्तरसंचारराहित्यमिति यावत्। धारणा नाभिहृदयनासाग्रादिदेशे विषयान्तरपरिहारेण
चित्तस्य स्थिरीकरणं। ध्यानं प्रत्ययैकतानता विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणमिति यावत्। उक्तलक्षणं ध्यानमेवा
र्थमात्रनिर्भासं अहमिदं चिन्तयामीत्याकारशून्यं निर्विकल्पकसमाधिः। यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपाण्यष्टांगा
नि यस्य एवंभूतः योगः। चित्तवृत्तिनिरोधः। चित्तस्य वृत्तीनां प्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपाणां निरोधः स्वकारणे लयः। सथा सति
तथा सति पुरुषस्य चिद्रूपतायामवस्थितिर्भवति। अत्राभियुक्ता वदन्ति। गणेशाधिष्ठितचतुर्दलकमलमूलाधारवर्तिनीं बिसतन्तुतनीयसीं कुंडि
लिनीमुत्थाप्य लिंगस्थाने षट्दलकमले स्वाधिष्ठानचक्रे ब्रह्माधिष्ठिते नीत्वा ततउत्थाप्य नाभिस्थाने दशदलकमलयुते मणिपूरचक्रे नाराय
दल णाधिष्ठिते नीत्वा ततउत्थाप्य हृदयस्थाने द्वादशकमलयुते रुद्राधिष्ठितेऽनाहतचक्रे नीत्वा ततउत्थाप्य कंठस्थाने षोडशदलकमलयुते आत्माधिष्ठिते

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशुद्धचक्रे नीत्वा ततउत्थाप्य भ्रुवोर्मध्ये द्विदलकमलयुते परमात्माधिष्ठिते आज्ञाचक्रे नीत्वा ततउत्थाप्य ब्रह्मरंध्रं नयेत् तदा योगी भवतीति ॥ वै
वल्यफलकेनादृश्ययोगेविद्यमानेयानिरुद्ध्याआसन्यागरिष्ठाः श्रेष्ठाः दर्शिष्कारयः ये रखिलमुनिजनास्तेषां कनीनिकाश्वेष्ठस्तारकाः तार
काक्षाणः कनीनिकेत्यमरः। तारवच्चंचच्चंचरिकाः भ्रकाशमानभ्रमराः नेपाय आमोद आनंदः तस्य संपादके चरणारविंदे यस्यास्तत्यथे । निवा
॥ निवासीकृतननजनहृदयारविंदा अरविंदनिष्यंदमरंदरसपानमदविदिदिरसुंदरीसंदोहझंकारसंकलितदशादिशांतराले॥ ॥सीकृत
नतजनानां हृदयारविंदयेत्यर्थः अरविंदेभ्यो निष्पंदः प्रयुतः मकरंदरसः पुष्परसः तस्य पानेन मदवत्यः याः इंदिंदिरसुंदर्यः भ्रमरस्त्रियः
तासां संदोहः समूहास्तेषां योसंकारस्तेन संकलितं पूरितं दशानां दिशानां मन्तरालं यस्याः पत्यर्थः । दिशाः शाद्रष्टाबंतः यथा वाचा निशा दिशो तिभागु
रिणा हलंते भ्योपि यपांगीकारात् ॥ निकटतटि। निकटतटे समीपदेशे वर्त्तिवर्त्तनं ये पातेनिकटतटवर्त्तनः । आगगनतलपरिकलिताः ग
गनतलपर्यंतसल्लग्राः अत एवोन्नताः ये रसालसालाः आम्राः सर्जाश्चितेषां जालानि समूहास्तेषामंतरालशाखिकासु मध्यस्थितिर्यस्य ता
स्थाः ता सा पालिकाः समुदायाः अत्र वर्त्त्यनुप्रासः शब्दालंकारः एकद्विप्रभृतीनां तु वर्णानां यथा भवेत् ॥ निकटतटवर्त्तगगनतलप
रिकलितोन्नतरसालसालजालांतरालशाखिकापालिकाकलितलतलक्षितकापरिकलितकेलिकाडोलिकादोलन्मधुकरवालिकासमंजसपरिविस्त
मरचरणकिसलयलसन्नूपुरस्वरतातरकाकामिनीकामनावरनुपारकिरणकिरणखंडमंडलरविलसुमवृंदसरमंदमकरंदसरसविलिहतु
दितमिलिंदसुंदरीवृंदसंकारसंरावशुनिरवानुरूपनिरूपितगानामृतवशीकृतामरपन्नगधरविद्याधरवीणाधरशालाधरकामिनीपाली
रितवीणामधुरराणाम्लानशरीरइवीभूतनूतनहविच्छलाफलकनिकामगलद्विरलकमलमिलितपयंतिकतलोदितहरितविशदशाद्वल
नवेद्रनवीनकिसलयस्वलव्यजनजनितोपचारशमितशारजशारसमरपरिभववेदनजलकेलीविहरमाणवनिताजनताकुचकलकुंभमंडल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का०ति०

॥४०॥

विलिप्तमृगमदमिलितचंदनगंधसुगंधितजले॥ ॥पुनरुक्तिरसौ नाम वस्तुन्युपासरूप्यनरतितल्लक्षणात्। तादृशा पालिकासु ललिताभिः
लतिकाभिः परिकल्पिताः निर्मिताः केलिकाः डोलिकाः क्रीडादोलिकाडोलिकादोलिकानेति त्रिरूपकोशः। तासु अंदोलन्त्यः या अमरबालिकाः
देवकन्यास्तासां समंजसं यथा तथा उपरिविस्तृमराणि प्रसरणशीलानि यानि किसलयानि वचरणानि। अत्रोपमालंकारः। उपमानोपमे
ययोः सहृदयहृदयाह्लादकारित्वेन सादृश्यस्योल्लसनात्। नेपुष्पसंतियानि नखराणि नखानि तान्येव नारकास्ताराः तासु कामिनीकाम
याः वस्तरेस्तु घारकिरणश्चंद्रः तस्य किरणखंडानां मंडलं तदिवाचरतं तादृशमंडलात्त्वानि परिकात्। आचारे क्विप्। ततः शता एतादृशीय
दखिलं सुमवृंदं कुसुमसमुदायः कुसुमं सुममित्यमरः। सुमवृंदे किरणखंडमंडलोत्प्रेक्षा। संभावना स्यादुत्प्रेक्षेति तल्लक्षणात्। विप
यधर्मिकतादात्म्यसंसर्गकविधेयकाहार्यात्मकः उत्कटैककोटिकः संशयः संभावनेति दिक्। सुमवृंदस्य सप्तमी। चीनः अ
मंदः अनिवारितः मकरंदरसः तस्य बिंदूनां कणानां लिहेनास्वादेन तुंदिलाः मिलिंदसुंदर्यः भ्रमरस्त्रियः तद्वृंदस्य झंकाररूपः स्वरावः
वाद्धः सकलश्रुतिरवः गानरमणीयतापायकोऽब्द निविशेषः तस्यानुरूपं यथा तथा निरूपितं यत् गानं तद्वाम्नतं तेन वशीकृताः अमरप
ण्णधरविद्याधरवीणाधराः याभिस्तास्तथा। अत्रद्वंद्वगर्भबहुव्रीहिः। अमराः देवाः फणाधराः नागाः विद्याधराः जातयः वीणाधराः गंधर्वाः तादृश्यः
शोणाः अधरः यासां ताः शोणाधराः कामिन्यस्तासां पाणिभिरीरितानां वादितानां वीणानां मधुररागः मधुरनादः सएवामृतं संगीतसाद्गुणीभूतेभ्यः
नेत्तनहरिन्द्रिकुला फलकेभ्यः अर्थात्संगासोपानसंबंधिभ्यः नवीनहरितमणिफलकेभ्यः निकामं यथेष्टं यथा तथा गलत् स्त्रवत् अविच्छिन्न
यत्कमलंकजलं तेन मिलितपर्यंतिकतलं प्रांतभूमिः तस्मिन्निदितेउत्सवे विशारदः विस्तृतः शारदसमुदायः आसमसमुदायः। शारदोजं बाल्यशाषसा
रित्यमरः। तस्या लोकनेन पनीयतत्वः अतिशायेन पतत्यः कुरंगवरांगनाम्ःगयः। पनीपतदित्यस्य पद्धंगतत्वेनुपिसे या करणशिरोम
णिनाकैयटोपाध्यायेन तस्य भाषायामपि व्यवस्थापितत्वात्। कविकुलाभिमुक्तेः प्रत्युक्तत्वात्साधुता। नासांयुगानमेलनं मिथुनसंगः

१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनसरीसृप्यमानः पुनः पुनः प्रच्युतः अतएव सरीरीत्या प्रवाहरूपेणलजरीजंभदतिस्फुरन्त्यरणीम्मदः मृगमदः तस्य सुगंधस्तस्य अबंधुबं
धुरिव सहचरद्दवसपद्यमानः बंधुर्बभवन्तत्मधाधिवासीतियावत्। वर्त्तमानः ईषच्चलनेन चालीयः पवमानः गंधवहस्तेन विधूयमानानि कंपि
तानि बहूनि नवीनकिसलयानि बहुनूतनानि पल्लवानि पल्लवो स्त्री किसलयमित्यमरः। तेषां छलं व्याजो येषां तादृशानि यानि व्यजनानि। अत्र कैत
वापन्हुतिरलंकारः छलव्याजादिशब्दैरपन्हवस्य स्पष्टीकरणात्। तादृशव्यजनैर्जनितेनोपचारेण शमिताउपशमिता शस्त्रशरसमरपरिभववेदना
कुसुमशरयुद्धपराभवजनितग्लानिर्यस्याः एतादृशी जलकेलीविहरमाणाउपरिजनितपरिश्रांतिशांतये जलक्रीडाविहरमाणयावनिताजनता
युवतिसमूहः तस्याः कुचकलकुंचमंडलं जंबीरविरोषफलतुल्यकुच इति रागः लकुचोलिकुचस्त्यमरः। तन्मंडलेविलिप्तस्य मृगमदमिलितस्य
कस्तूरिकयायुक्तस्य चंदनस्य गंधेन सुगंधितो जलयस्याः इत्यर्थः। कोधेनचतपो यद्दत्कोमेन चयथा मतिः अनयेन यथालक्ष्मीर्विद्यामानेन
॥समस्तनदीप्रशस्ते। निस्तुलशास्तनर समस्तवास्तव्यहस्तिकुंभस्तनीहस्तन्यस्तशातकुंभकुंभेभ नजनितनिनरवधिरीकृतनभोंतराले॥
वैभवथा। दंभकौटिल्यमायाभिर्यथाधर्मोविनश्यति॥ तथानश्यंतिपापानिगंगायादर्शनेनतु। नास्तिगंगासमंतीर्थंकलिकल्मषनाशनमितिव्यासो
क्तमनसिकृत्याह। समस्तनदीप्रशस्तेति। निगरव्याख्यातमेतत्। निस्तुलानिउपमारहितानि अतएव शस्ततराणि अतिप्रशस्तानि समस्ता
निवास्तव्यानि निर्मलकुलगृहाभरणानियासां तादृश्यः हस्तिकुंभस्तन्यः तादृशीनां पुरस्त्रीणां हस्तेन्यस्ताः गंगाजलानयनाय स्थापिताः शातकुंभकुं
भाः स्वर्णकुंभाः तेषां उंभनेन पूरणेन जनितो यो निनदः शब्दः तेन बधिरीकृतं भूनभसोरंतरालं ययेत्यर्थः॥ संततं निरंतरं आश्रितानां जनानां भक्ता
नां सुरद्रुमायमाणस्य कल्पवृक्षसदृशस्य दक्षिणमूर्तेर्वरप्रसारेन लब्ध्या कवितयासंतोषिताः विद्वज्जनायेन एतादृशो यो विठ्ठलः विकंठीरवः वि
ठ्ठलविश्रेष्ठः श्रीनीलकंठभट्टः तस्य वाङ्मालिकाः गद्यपद्यरूपवाकूपरंपराः ता एव सुमालिकाः पुष्पमालाः ताभिरभिरामेत्यर्थः॥ लसंतः उत्तुंगाः
उन्नताः अभंगाः अखंडाः तरंगा यस्याः इत्यर्थः। प्रलम्येति। इंदुरो खरउवाचेतिशेषः। अहह आश्चर्यं। आश्रिताः जनाः तएव अगमाः वृक्षाः तेषां वसंता।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥का० ति०
॥२२॥

संतताश्रितजनसुरद्रुमायमाणदक्षिणामूर्तिवरप्रसादलब्धकवितासंतोषितविद्वज्जनविद्वत्कविकंठीरववाङ्मालिकाकुसुममालिकाभिरामे। लसत्तुंगाभं
गतरंगे गंगे पाहि पाहीति साष्टांगं प्रणम्य। अहो हे जन्मनः साफल्यं। अहो आश्रितजनागमवसंतवसंततो रवरकिंवदाभिवाराणसीप्रशंसा॥ ॥वसंत
कालस्य वृक्षानंदोधायकत्वमिति प्रसिद्धमिति वसंतत्वारोपः। वाराणसीति। वरं अनः वरानः श्रेष्ठं जलं। अनः क्लीबं जले इति निरमसः। तस्याहृदे भवा अहर
भवश्चेत्यणा। आदिवृद्धिः। पूर्वपदात्संज्ञायामिति णत्वं। एवं च काश्यपखलु प्रसिद्धो। निखिलपुरीप्रशास्तेति। इदं प्रपंचितमन्यानि पुण्यक्षेत्राणीत्यादिना।
पुरुषोत्तमरत्ये नैवसमासः। तावदितिवाक्यालंकारे। काशीश्रीरूपेणवर्णयति। आगगनेति। आगगनतलेपरिकलितनिर्मितं अतएवोन्नतंयत्कन
कावरणं सुवर्णप्राकारः तस्य मुखतया मुखत्वेन कबरीमिव पयोधनुपंक्तिं जलधरपंक्तिं अनुसरतीत्यन्वयः। एवमग्रेपि। अतिरुचिरयत्तारकाकुलं
तच्छुक्लानि अच्छतराणि स्वच्छानि यानि मुक्ताफलानि तैरुपचितं वर्द्धितं भूषणं यस्यास्तादृशीं सीमंतवीथीमिव केशावेशमार्गमिव। अमलानां शु
॥एवंचखलु निखिलपुरीप्रशास्ता सा वद्वागगनतलपरिकलितोन्नतेकनकावरणमुखतया कबरीमिव पयोधरपंक्तिमतिरुचिरतारकाकुलच्छ
॥न्नाछतरमुक्ताफलोपचितभूषणां सीमंतवीथीमिव नक्षत्रवीथीममलहीरोपलकमलरागशकलकृतमंडनं कुंडलद्वयमिव शशितरणिमंडलद्व
॥यमतुलनासामौक्तिकमिव कविं पार्श्वद्वयवद्धलीलाश्लिष्टं स्वयं कुचद्वयमिवानुसरतीति॥ ॥अमलानां हीरोपलानां हीरकाणां कमलरागाणां पद्मरा
गाणां च शकलैः खंडैः कृतं मंडनं यस्मिन्निति अर्थः। शशितरणिमंडलद्वयमिति। अयंभावः। सूर्यास्तमयसमये पूर्णचंद्रोदये सति हीरकशक
लकलितकुंडलमिव चंद्रमंडलं पद्मरागरक्तमंडितकुंडलमिव सूर्यमंडलमनुसरतीति कविं शुक्रं पार्श्वद्वये वद्धः लीलासमुच्चयः विंदुमाधव
सन्निधौ प्रसिद्धः तं कुचद्वयमिवानुसरंतीं अनुकुर्वंतीं॥ मरकतोपलैः खचितानां कनकघटानां स्वर्णघंटिकानां घणघणेति निक्वणः ध्वनिः तस्या
नुगुणं विपुलमेखलामिव विस्तृतकांचीमिव भागीरथीमाश्रयंतीत्यन्वयः। कथंभूतां भागीरथीं। निकटतटे विघूर्णमानाः विशंकटाः विशालाः
कुटिलविटपिनः वक्रतरवः। विशंकटं पृथुवृहद्विशालं पृथुलं महदित्यमरः। तेषां विटपाः शाखाः तेषां पटले समूहे गतानि श्यामानि हरितानि प

21

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोशानितेषां कुलस्य गिलनेन प्रसिद्धाः ताद्दृशा गिलनचणाः मधुरनिनदेन मधुरध्वनिना प्रसिद्धाः मधुरनिनदं चञ्चवः तेन विचरन्ति चञ्चुपुटयोः
॥मरकतोपलखचित कनकघटघटित घटनिकुरम्बतुल्य विपुलमेखलामिव निकटतटविटंकटकुटिलविटपिविटपपटलगतहरितपलाशकुल
॥गिलनचणमधुरनिनदचञ्चुपञ्चशरतुरगगरुत्मितानतनन्यमानशोभामभिनगरपरिवर्तमानां भागीरथीमाश्रयन्ती॥ ॥प्रत्यययोर्विधानात्। स्ता
दृशाः पञ्चशरस्य स्मरस्य तुरगाः [illegible]काशतिप्रावत्। तेषां गरुद्भिः पक्षैः नितान्तं तन्यमानो विस्तार्यमाणा शोभायस्यास्तामित्यर्थः। परिखायां वर्तमाना
भागीरथी कनकप्राकारस्य ताद्दृशा[illegible]काशीनां च प्रतिच्छायया ताद्दृशा घटिकायुक्तमेखलावत्स्थितिमातीतिभावः॥ पंडितेंद्राणामास्थानत्वेन नावगणयति
श्रीविश्वेति। श्रीविश्वनाथपदारविन्दयोर्मन्दिरायमाणमानसं येषामित्यर्थः। संध्याकाले नृत्यन्धूर्जटिः शिवः तस्य जटाजूटेन लोलुठत्याः गंगायाः
सकाशात्पतनीपततः अतिशयेन पतितः अभ्रगास्तरंगाः तद्वारा चरत्यः वाग्धाराः येषामित्यर्थः। श्रीमद्गुरोः कृपाकटाक्षवीक्षणप्रसादेन लब्धपद
वाक्यप्रमाणेषु व्याकरणपूर्वोत्तरमीमांसान्वेषु विद्यमानानां सिद्धान्तानां निर्धारणस्वतन्त्राणामित्यर्थः। स्वभवनान्तः स्वगृहाभ्यन्तरे स्फुरन्तः सततम
त्ताः येगजास्तेषां गण्डमण्डलेभ्यः स[illegible]स्वस्यमानायमदासारे षां प्रवाहस्य लोलाः कल्लोलास्तरंगास्तेषां मालासु खेलन्तीनां दिंदिरसुन्दरीणां भ्रमर
॥श्रीविश्वनाथपदारविंदमंदिरायमाणमानसानां संध्याकालनृत्यद्धूर्जटिजटाजूटतटीलुठद्गंगापतनीपतदभ्रगतरंगायमाणवाग्धाराणां श्रीमद्गु
॥कृपाकटाक्षवीक्षणप्रसादलब्धपरवाक्यप्रमाणसिद्धान्तनिर्धारणस्वतन्त्राणां स्वभवनान्तःस्फुरत्सततमत्तगजगण्डमण्डलसरीस्वस्यमानमदझरी
॥लोलकल्लोलमालाखेलदिंदिंदिरसुन्दरीसंदोहकलसंकारकलुषसंकुलितभुवनभोनरालानां पण्डितानां चण्डिमोद्दण्डानामास्थानमुन्मीलितादिमरसाङ्कुरस्य
॥बीजं श्रीविश्वनाथपरिपालिता मुक्तिनगरीनामलक्ष्मीः॥ ॥स्त्रीणां संदोहस्य कलेन मधुरेण सकारात्मकशब्देन संकुलितं पूरितं भुवनमेसारं [illegible]लं
ये इत्यर्थः। पाण्डित्याः पाण्डित्यस्य चण्डिम्ना प्रचण्डतया उद्दण्डानामास्थानं उन्मीलितः आदिमरसस्य शृंगारस्य अङ्कुरस्तस्य बीजं उत्पत्तिस्थानं। एतादृशी
श्रीविश्वनाथेन परिपालिता मुक्तिनगरी नाम लक्ष्मीः अत्रेनामेत्यव्ययं नामवदर्थकमित्येके गीकुर्वन्ति केचित्तापरे तु राहार्थ[illegible]तत्र धर्मे गीकृत्य यथाशु
नमेवसाधयन्ति॥ क्षणान्तरं च विश्रम्य [illegible] अवादीदित्यन्वयः। कोलाहलः कलकलः। नवसन्तरोरवर्णं मञ्जुभाषिणं मधुरभाषिणं॥२०॥ तत्र गत्वा निरलम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥का० टि०

॥१२॥

॥क्षणं तत्र विश्रम्य। अरे इंदुशेखर सर्वं सम्यगुक्तं त्वया किं तु श्रूयमाणः कोवा कोलाहलः। इत्युक्तवंतं तं हृष्टः सततं मंजुभाषिणं। सरसं मधुरं वा
॥क्यमवादीदिंदुशेखरः॥ २०॥ अहो वसंतशेखर श्रीविश्वनाथपूजामहोत्सवकालिको वादित्रविशेषाणां कलकलः खलु। तदत्र न स्थातव्यमि
॥ति तत्र तेन गत्वा। समीपसंचरत्तुषारकिरणकिरणसंस्पर्शेन तत्क्षणद्रवीभूततत्रत्यसुवर्णस्तंभाग्रभागनिक्षिप्तस्फटिकशिलासालभंजिका
॥पुंजकरकंजकलितचंद्रकांतशिलामयकलशमुखगलज्जलधारासंपादितवर्षागमभ्रमविकसितनिर्तृष्णचातकमुखारविंदप्रसादप्र
॥शस्तरत्नमंडपं प्रविश्य॥ ॥उपविश्येत्यन्वयः। वसंतशेखरेणासह इंदुशेखर इत्यादिः। कथंभूतं रत्नमंडपं। समीपे संचरतस्तुषारकिर
णस्य चंद्रस्य किरणानां संस्पर्शेन तत्क्षणं द्रवीभूता ये तत्रत्यसुवर्णस्तंभाग्रभागनिक्षिप्तस्फटिकशिलासालभंजिकापुंजकरकंजकलितचं
द्रकांतशिलामयकलशाः तत्रत्यानां सुवर्णकलशानां स्तंभानामग्रभागेषु निक्षिप्ताः स्थापिताः स्फटिकशिलासालभंजिकाः स्फटिकशिलानिर्मि
तप्रतिमाः तासां पुंजस्य करकंजेषु हस्तकमलेषु कलिताः निक्षिप्ताः चंद्रकांतशिलामयकलशाः इति तदर्थः। तेषां मुखेभ्यो गलंतीभिः जलधा
राभिः संपादितेन वर्षागमभ्रमेण विकसितानि निर्तृष्णानि पिपासूनां चातकानां मुखारविंदानि यस्मात् एवंभूतेन प्रसादेन प्रशस्तमित्यर्थः॥
आवामपीत्यपिना अत्रत्याः कृतार्था एवेति सूचितं। कृतार्थत्वे हेतुमाह। पार्वतीति। हि यतः। सांजलिबंधमिति। नमस्कृत्येत्यन्वयि। यदंघ्रीति। य
स्यांघ्रिकमलद्वंद्वे कर्णिके व श्रुतिराभवत्। नेपूरत्ति यावत्। आङ्पूर्वकभूधातोर्लङ्। एतस्मै चंद्रचूडायेश्वराय मंगलं यथा तथा नतिमार्पिपं
॥अहो वसंतशेखर आवामपि कृतार्थौ पार्वतीरमणचरणनलिनवीक्षणं हि। सांजलिबंधं। चेदंघ्रिकमलद्वंद्वे कर्णिकाश्रुतिराभवत्। नति
॥मार्पिपमेतस्मै चंद्रचूडाय मंगलं॥ २१॥ श्रीमदंभोजसंभवकुंभिनीरमणकुंभिनीभृद्रुद्ररुद्रगणाखिलसुरवरकिन्नरकिंपुरुषगरुडोरगयक्ष
॥रक्षःपटलमुकुटतटघटितरत्नोपलविपुलघृणिषु। नीविकसद्मलकमलशंकाकरपदकमले। निवासीकृतनतजनहृत्कमले॥ ॥अर्पि
तवानस्मि। आर्तेर्णिजंतस्य लुङि अर्तिह्रीत्यादिना पुगागमे रूपं॥ २२॥ श्रीमानंभोजसंभवः ब्रह्मा कुंभिन्याः पृथ्व्याः रमणो विष्णुः कुंभिनी

२३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽद्वरुद्धरणः पर्वतपक्षनाशकः इंद्रश्च एतदादयो येऽखिलसुरवराः किंनरकिंपुरुषोरगयक्षरक्षांसि च तेषां पटलं समूहस्तस्य मुकुटानां तटे घृष्टिता
नां रत्नोपलानां विपुलाः छटायः ता एव धुनी सरित् तस्या विकसद्यद्दमलकमलं तस्य शोभां करोतीति तत् शोभाकरं पदकमलं यस्य तस्मिन्नित्यर्थः। निवा
सीकृतं अगारमिव कृतं नतजनानां हृत्कमलं येन तस्मिन्नित्यर्थः॥ माननीयानां महनीयाः पूजनीयाः तपोनिष्ठा वागरिष्ठाः ये वशिष्ठादयः अखिलमु
निजनास्तेषां मनांस्येव सरसीरुहाकरः पद्माकरस्तस्मिन् हंसायमानः तस्मिन्नित्यर्थः। सरसीरुहपदस्य रूढ्यर्थतावच्छेदकपद्मत्वावच्छिन्नपरतया
निर्देशः। नतजनानां सुरद्रुमायमाणे परिनिष्ठितविमत्सरैः तेन साकं समासस्यापि महाभाष्यकारसम्मतत्वात् तथा विग्रहप्रदर्शनं। तन्नेतत्रे निष्ठेयं।
॥ माननीयमहनीयतपोनिष्ठागरिष्ठवशिष्ठाद्यखिलमुनिजनमनःसरसीरुहाकरहंसायमाने। नतजनसुरद्रुमायमाणे। परवाक्यप्रमाणपारावा
॥रीणपंडिते हृत्कमलकर्णिकाधिष्ठिते। श्रीविश्वनाथे मनोऽनवरतं रमतामिति नमस्कृत्य॥ ॥परवाक्यप्रमाणपारावारीणाः ये पंडिताः अवारपा
राद्विगृहीतादपि विपरीताच्चेति वक्तव्यमिति वार्त्तिकेन खप्रत्ययः। तेषामिंद्रः श्रीनीलकंठभट्टः तस्य हृत् हृदयं तदेव कमलं तस्य कर्णिकायामधिष्ठि
तस्तस्मिन्नित्यर्थः। ननु तत्काले ग्रंथकर्तुरेवाभावेन तत्संबंधित्वेन तत्तद्देवतावर्णनमिदं ईश्वरस्य कथं घटते इति चेदित्थं। ईश्वरभक्तः सर्वज्ञरदृशीश्वरः
भगवदुक्तेश्चेति शापितकीर्तिमान् भाविनमीश्वरभक्तं वरिष्ठमाकलय्य तन्मतसंबंधित्वेन तत्तद्देवतावर्णनमकार्षीत् इदानीमीश्वरप्रसादेन ग्रंथकर्त्रोत
देवानुदितमिति। न कश्चिद्विरोधः॥ अहहेत्याश्चर्ये। अनल्पमिति। शृण्वित्यन्वयः। कथंभूतां विकस्वरं विकसनशीलं वदनं तदेव तामरसं सुखकमलं त
स्य रसेन तस्य वासनया समापतंतः अलिनिकराः भ्रमरसमूहास्तेषामुपमाकरा उपमास्थानानि नीलाः कुंचिताः कुंतलाः अलकाः यस्यास्तां। मुख
कमले लग्नो यः कस्तूरिकाबिंदुस्वरूपः पुष्पंधयः मधुपस्तस्य प्रसारितपक्षवत् आलक्षितं भ्रूयुगलं यस्यास्तां। श्रुतियुगलतले कर्णयुग्मप्रदे
शे अवतंसोत्पलस्य भूषणभूतकुवलयस्य दलमिवाचरित ॥अहह नयनयोः साफल्यं यतोऽनल्पं पूर्णा यादर्शनमित्यन्वयः पूर्णां विकस्वरवदनतामरसवा
॥सनासमापतदलिनिकरोपमाकरनीलकुंचितकुंतलां। मुखकमललग्नकस्तूरिकाबिंदुपुष्पंधयप्रसारितपक्षवदालक्षितभ्रूयुगलां। श्रुतियुगलतला
॥वतंसोत्पलदलायितकटाक्षजालां। प्रभातकालभासमानभास्वरबिंबशतिबिंबसरागरत्नराजविराजितकुंडलां। शरच्चंद्रचंद्रिकाधवलमंदहासां।
॥परिपूर्णकरुणावलोकनसूचितसुभगसंतानानुग्रहलीलाविलासां। राकाविराजमानराजमंडलसन्निभवदनां। कुंदरदनां॥ ॥कटाक्षजालं यस्यास्तां।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रभातकाले भासमानस्य भास्करबिंबस्य श्रुतिबिंबभूते सरागरत्नराजविराजितकुंडले यस्यास्तां। सरागैः रक्तैः रत्नराजैः रत्नश्रेष्ठैः विराजिते कुंडले
रतिनरथेः। शारदचंद्रचंद्रिकेव धवलो मंदहासो यस्यास्तां। परिपूर्णकरुणावलोकनेन सूचितः सुभगः सततानुग्रहलीलाविलासो यया तां। राकायां पू
र्णिमायां विराजमानराजमंडलं चंद्रमंडलं तत्सन्निभं तत्सदृशं वदनं यस्यास्तां। कुंदरदनामिति। कुंदकोरकतुल्यरदनामित्यर्थः॥ भुजयुगलमेव मृ
णालिकान्तस्याः अंचले प्रांते समंचितयत्कमलं तदुल्लसितौ हस्तौ यस्यास्तां। नाभीमयस्यालवालस्य मध्ये विनिर्गतो रोमावली स्वरूपा तुंगश्रृंगारस्व
ल्लिकान्तस्याः कुसुमकलिकेवाचरन्मुक्ताहारो यस्यास्तां। नानाविधरत्नैः खचितानां कंकणमेखलांगुलीयकनूपुराणां व्रातेन सम्यक्‌ हेन समुज्ज्वलां।
जघनेति। जघनपुलिनं सैकतं तस्मिन्‌ जातो जातरूपस्य सुवर्णस्य कदलिकास्तंभो न यः सारंभगजेंद्रमालं तद्‌डाससमानमिति था। वेत्ता तादृशा प्रभुरूपु
॥भुजयुगमृणालिकांचलसमंचितकमलचरुल्लसितहस्तां। नाभीमयालवालमध्यविनिर्गतरोमावलीतुंगश्रृंगारवल्लिकाकुसुमकलिकायमानमु
॥क्ताहारां। नानाविधरत्नखचितकंकणमेखलांगुलीयकनूपुरव्रातसमुज्ज्वलां। जलघनपुलीनजातजातरूपकदलिकास्तंभसंरंभजंभमालोरु
॥युगलां। पदकमलमयनूरकलितकनकमदनतूणीरायितजंघायुग्मां। वदनकांतिसमुद्भूतपतिपराभवनिवारणकामनावतरच्चरणकमल
॥पुंतापतन्नारकायितनखरां। निखिलनिरवद्यनिरतिशयकल्याणगुणनिलयायमानां॥ गले- यस्यास्तां। पदकमलमयेन पादारविंदस्वरूपेण
नूरेण कलितः स्फुरितः कनकस्य मदनतूणीरः तद्वदाचरितं जंघायुग्मं यस्यास्तां। वदनकांत्या समुद्भूतोः पतिपराभवस्तन्निवारणकामनया
वतरंत्यः चरणकमले पतापताः पतिताः यास्ता रक्ताः चरिचलिपनिवरीनावाहितम[illegible]च्याकुंचाभ्यासस्येति निष्पन्नः पतापतन्नाद्रः तादृशाः नारका इ
वाचरिताः नखरा यस्यास्तां। निखिलाः निरवद्याः निर्दोषाः ये अतिशयकल्याणगुणास्तेषां निलयायमाना स्थानभूतामिति यावत्‌॥ परदाक्ष्यप्र
मालपारावारीणपंडितेन प्रसादैर्भोमः श्रेष्ठः श्रीनीलकंठभट्टः तस्य मनोरथानामभीष्टार्थानां पूरणेन तिरस्कृतः सुरवरतरोः कल्पवृक्षस्य वि
लासो यया तां। भक्तेन नराजानाभक्तेषु ध्यानां विलसितस्वहृदयकमलस्य कर्णिकामध्ये संस्थापितचरणकिसलयया तां। श्रीविश्वनाथेन कृते
यत्सुकृतं तदेव सुरतरुः तस्य फलायमाना फलवदाचरंती। अधरेण जितं बिंबफलं यया तामित्यर्थः। वर्षाकाले तारापथस्य आकाशस्य लक्ष्मी
मिव लसंतौ भारोरुतैरोपयोधरौ स्तनौ यस्यास्तां। लक्ष्मीपक्षे तुलसंतः भारभूताः घनीभूताः पयोधराः जलधरा यस्यास्तामित्यर्थः। सुयोधनस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ंप्रदवाक्यप्रमाणपारावारीणपंडितसार्वभौममनोरथपूरणतिरस्कृतसुरवरतरुविलासां। भजज्जनराजविलसितहृदयकमलकर्णिकाम
॥ध्यासस्थापितचरणकिसलयां। श्रीविश्वनाथकृतसुकृतसुरतरुफलायमानां। अधरजितबिंबामंबां। वर्षाकालतारां पृथुलक्ष्मीमिवलस
॥द्वारपयोधरां। सुयोधनस्थितिमिव कर्णविश्रांतिलोचनां। वनचरसेनामिव सुग्रीवांगदविभासमानां रम्यां॥ ॥दुर्योधनस्य स्थितिमिव क
र्णयोर्विश्रांते लोचने यस्यास्ताम्। अन्यपक्षे कर्णे राधेये इति ध्येयं। वनचराणां कपीनां सेनामिव सुग्रीवयाअंगदेन बाहुभूषणेन च विभासमा
नां। अन्यपक्षे सुग्रीवेण अंगदेन ताराप्रुत्रेण च इत्यर्थः। एवंभूतां अंबां पार्वतीं नमाम्येति। वसंततोरस्वरेण सह दुर्शेवखरः सनुतो घति शेषः॥

K K S U LIBRARY RAMTEK 441 106 M-1664 Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=21.10.20 16:57
,TRANSFERRED=2020/10/21 at 17:01:27
,PAGES=26
,TYPE=STD
,NAME=S0004333
,Book Name=M-1664-KASHIKA TILAK SATIK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection